# Shivotkarshamanjari

# શિવોત્કર્ષમઞ્જરી

## Document Information

Text title : shivotkarShamanjarI by nIlkaNThadIkShita

File name : shivotkarShamanjarI.itx

Category : shiva, nIlakaNThadIkShita

Location : doc_shiva

Author : Nilakantha Dikshitar

Proofread by : Rajani Arjun Shankar

Latest update : March 19, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 19, 2021

*sanskritdocuments.org*

# શિવોત્કર્ષમઞ્જરી

યા લક્ષ્મીસ્ત્રિજગચ્છરણ્ય-ચરણા તસ્યાઃ પતિર્યચ્છરો
યદ્દેયં નિખિલૈર્વદાન્ય-નિવહૈસ્તદ્યસ્ય જીર્ણં ધનુઃ ।
યા સંવિચ્છ્રુતિષુ સ્મૃતા રહસિ સા યત્પાદ-સંસેવિની
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧॥

અર્ચામીતિ ધિયા યદેવ કુસુમં ક્ષિપ્ત્વા જનો મુચ્યતે
વિધ્યામીતિ ધિયા તદેવ વિકિરન્ ભસ્મીકૃતો મન્મથઃ ।
ઇત્યાભ્યન્તર-વૃત્તિમાત્ર-રસિકો બાહ્યાનપેક્ષશ્ચ યઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨॥

યત્કેશાગ્ર-વિલગ્નમમ્બુ જગતાં તીર્થં પરં પાવનં
યદ્વીર્યં ભુવિ દક્ષિણેતિ વિહિતં યજ્ઞેષુ સર્વેષ્વપિ ।
શ્વાનો યસ્ય તપસ્વિનાં ચ મહતાં કામપ્રદા ધેનવઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩॥

વક્ત્રાબ્જેષુ પિતામહસ્ય જગતાં વક્ષઃસ્થલે શ્રીપતેઃ
સર્વાઙ્ગેષુ શતક્રતોરપિ દૃઢાનુચ્છ્રિત્ય જૈત્ર-ધ્વજાન્ ।
સંપ્રાપ્તો મદનોઽપિ યસ્ય નિટિલજ્યોતિઃપતઙ્ગાયિતઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪॥

યદ્દાતું કૃતલોભ એવ પરમં ધામ સ્વભક્તાન્ પુરા
કાકુત્સ્થોઽપ્યતિસન્દધે સ ભુવનાન્યન્યાનિ સૃષ્ટ્વા તદા ।
આવેધો-મશકં તદેવ તૃણવદ્દત્તેઽવિમુક્તે તુ યઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૫॥

સેતું યત્ર નિબદ્ધ્ય યત્ર વસુધામુદ્ધૃત્ય મગ્નાં પુરા
વિખ્યાતો મધુસૂદનઃ સ જલધિઃ યત્સ્રોતસા પૂરિતઃ ।
સા જાહ્નવ્યપિ યજ્જટા-તનુશિખા-લમ્બામ્બુ-લેશાયિતા
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૬॥

દાતવ્યસ્ત્રિદિવઃ પ્રતિક્ષણ-પરિક્ષીણઃ સમસ્તૈઃ સુરૈઃ
તદ્દાનાય ચ તે કિયત્કિયદિવ વ્યાપારયન્તે જનાન્ ।
અક્ષય્યં પદમાપ્યમત્ર ચ સકૃદ્યત્કીર્તનં સાધનં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૭॥

મન્ત્રે વા ક્વચિદર્થવાદ-શકલે દિષ્ટયા ગૃહીતે સકૃત્-
સ્વે નામ્નિ ત્રિદશા વહન્તિ મહતીં કીર્તિં યદીયોક્તિષુ ।
શ્વાનસ્તે નિગમા યદીય-ભવનદ્વારે ચરન્તિ સ્વતઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૮॥

યઃ સાન્તાનિક-લોકદસ્તનુભૃતાં યઃ સર્વ-લોકેશ્વરઃ
સોઽપ્યાહૂયત મર્ત્યભાવ-ભજનાત્ કાલે ન કાલેન કિમ્ ।
તાદૃક્ષોઽપિ સ કસ્યચિદ્-દ્વિજ-વટોસ્ત્રાણાય યેનાહતઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૯॥

કસ્મૈચિદ્-દ્વિજબન્ધવે કિયદપિ ક્ષીરં પુરા યાચતે
દત્તો યેન દયારસૈક-વપુષા દુગ્ધોદ એવાર્ણવઃ ।
શ્રીશ્રીવલ્લભ-કલ્પપાદપ-સુધા-ચિન્તામણીભિઃ સમં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૦॥

કેનાસ્માનતિશેરતે દિવિચરાઃ શ્રુત્યા ગૃહીતા હિ તે
કિં નાસ્માન્ શ્રુતિરાહ તાન્ પરતયા બ્રૂતે કિમસ્માન્ સ્વકાન્ ।
સર્વે ચેત્પશવો વયં કિમિતરૈઃ સર્વસ્ય યો મોચકઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૧॥

બાણો યસ્ય ન બાણકર્મ સહતે ચક્રે ચ યે દ્વે તયોઃ
એકં ચક્રકુલ-પ્રતીપમિતરચ્ચક્રાનુકૂલ-ક્રિયમ્ ।
જ્યા તુ જ્યાં શિરસા બિભર્તિ ભુવને સૂતો ન સૂતઃ ક્વચિત્-
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૨॥

ક્રત્વાત્મા પુરુષઃ ક્રતુઃ ક્રતુભુજો વક્તા ક્રતૂનાં ક્રતોઃ
આધારઃ ક્રતુકાલ-કલ્પનપરૌ સર્વેઽપ્યમી સંહતાઃ ।
યસ્યાતિક્રમતઃ સહ ક્રતુકૃતા ભ્રષ્ટાશ્ચ નષ્ટાઃ ક્ષણાત્-
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૩॥

આરોઢું વરમૌપવાહ્યમપહર્તું સુન્દરીઃ કન્યકા

ભોક્તું ભોજ્યમુપસ્થિતં સુખમલઙ્કર્તું ચ રત્નૈસ્તનુમ્ ।
સન્નહ્યન્ત્યમૃતાન્ધસો હિ શમિતે યેનૈવ હાલાહલે
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૪॥

સ્વં વાસો દશધા વિભજ્ય વિતરન્નેકૈક-ખણ્ડં પુરા
યશ્ચક્રે દશ પાકશાસન-હુતાશાદીન્ દિશામીશ્વરાન્ ।
યદ્ભિક્ષાશન-ભાગભાક્ ત્રિજગતામન્ન-પ્રદાત્રી શિવા
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૫॥

સ્વચ્છન્દં ચરતો હિ યસ્ય ચરણાઙ્ગુષ્ઠાગ્ર-સમ્પાદિતા
રેખા કાચન હેતિરાજ-પદવીં પ્રાપ્તા જગદ્વિશ્રુતામ્ ।
લબ્ધા દૈત્યભિદા તપોભિરુપદીકૃત્ય સ્વકં લોચનં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૬॥

બાણં કાચન બાણકોણમિતરા બાણસ્ય મૂલં પરા
યન્તારં કતિચિદ્રથાઙ્ગમિતરા શિષ્ટાઃ પુનઃ સ્વામિનમ્ ।
ઇત્થં સંસ્તુવતે ચિરન્તન-ગિરઃ સાક્ષાત્ પ્રણાલ્યાપિ યં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૭॥

પ્રાચીનેત્યધુનાતનેતિ ભુવને વાઙ્નામ યા યાવતી
તાઃ સર્વાઃ પરિતઃ પરીત્ય ચરણે યસ્યાયતી વિશ્રમમ્ ।
શ‍ૃણ્વન્નઙ્ગદતાં ગતઃ ફણિપતિઃ શબ્દાગમં વ્યાકરોત્-
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૮॥

ગાન્ધર્વાગમ-દેશિકૌ તનુભૃતાં યત્કર્ણયોઃ કુણ્ડલે
યત્પાદાઙ્ગદ-નિર્મિતં પદ-મહાભાષ્યં ભુવિ સ્ત્યાયતિ ।
પુણ્યં પાપમિતિ વ્યવસ્થિતિરિયં યદ્વાહ-હેષાકૃતા
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૧૯॥

ધ્યાત્વા વર્ષગણાન્ બહૂન્વિરચિતં યત્નેન યદ્વેધસા
યચ્છૌરિર્બિભરામ્બભૂવ બહુધા ભૂત્વા ચ મૃત્વા સ્વયમ્ ।
તલ્લોક-ત્રયમીષદુલ્લસિત-યચ્ચક્ષુઃસ્ફુલિઙ્ગે હુતં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૦॥

સૌમ્યાગ્નેયતયા ક્ષરાક્ષરતયા શબ્દાર્થ-ભાવેન વા
જીવ-બ્રહ્મતયા જડાજડતયા સ્ત્રીપુંસ-ભાવેન વા ।
દ્વેધા ભિન્નમિદં હિ યસ્ય વપુષી સવ્યાપસવ્યે વિદુઃ

સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૧॥

યલ્લાભાય પુરા કિયદ્ભિરમરૈઃ સિન્ધૌ કિયદ્વ્યાપૃતં
લેભે યત્પરિવેષણેન કિયતીં કીર્તિં રમાવલ્લભઃ ।
યચ્ચૂડા-કુસુમ-ક્ષરન્મધુરસ-સ્રોતઃકણઃ સા સુધા
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૨॥

યઃ સ્રષ્ટા જગતાં યતોઽયમભવત્ તદ્યસ્ય નાભેરભૂત્-
શેતે યત્ર સ તં ચ યશ્ચુલુકયાઞ્ચક્રે સહાન્યૈઃ ક્ષણાત્ ।
તાદૃક્ષાઃ શતશઃ પુરાણ-મુનયો યચ્છિષ્ય-વર્ગે સ્થિતાઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૩॥

નિર્વ્યાપાર-દશૈવ યસ્ય જગતી-નિર્વાહ-ધૌરન્ધરી
મન્દસ્મેર-મુખાબ્જતૈવ પરમો યસ્ય દ્વિષાં નિગ્રહઃ ।
નિત્યં યસ્ય ચ મૌનમેવ નિખિલં છિન્તે સતાં સંશયં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૪॥

દત્તા શ્રીરિષવે સિસાધયિષવે વાસો ગૃહીતં સુરૈઃ
સૂતાય વ્યયિતા ગિરશ્ચ કિમિતો દાતાસ્મ્યહં કેવલઃ ।
ઇત્યાલોચ્ય દયાનિધિર્દિશતિ યઃ કૈવલ્યમેવાર્થિનાં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૫॥

શારીરઃ પૃથિવી રવીન્દુદહના વાયુર્વિયત્તોયમિ-
ત્યષ્ટાભિશ્ચિદચિદ્ગણૈઃ પરિણતં વિશ્વં તનુસ્સ્વેતિ યઃ ।
વિશ્વં વિશ્વવિલક્ષણઃ પ્રભવિતા વિશ્વસ્ય વિશ્વાધિકઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૬॥

શબ્દ-ગ્રામ-મયી યદીય-ગૃહિણી ખ્યાતા યદીયં વપુઃ
ત્રૈલોક્યં જડ-ચેતનાષ્ટક-મયં યદ્વાણ-ગુપ્તં જગત્ ।
સર્વાસાં દયિતો ગિરાં સકલ-લોકાત્મા ચ સર્વેશ્વરઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૭॥

યજ્જાતીય-કણાઙ્કિતાનનમહિં જીર્ણં કમપ્યાવસન્
પાર્શ્વ-સ્થાપિત-પન્નગાશન-પતિર્જાગર્તિ નિત્યં હરિઃ ।
યત્કણ્ઠાભરણાયિતસ્ત્રિજગતી-ભીમઃ સ હાલાહલઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૮॥

અન્યોન્ય-શ્વસિતાશનૈઃ ફણધરૈરાવિશ્ય સત્ત્વાન્બહિઃ
ભુઞ્જાનૈઃ પરિચારકૈસ્તૃણકણૈરાનન્દિના નન્દિના ।
ભિક્ષાન્નોપચિતૈશ્ચ દાર-તનયૈઃ પુષ્ણાતિ વિશ્વાનિ યઃ
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૨૯॥

કેયૂરાઙ્ગદ-હાર-કુણ્ડલ-કટીસૂત્રોપવીતીભવ-
દ્ભોગીન્દ્રોદ્ભટ-ફૂત્કૃતિ-વ્યતિકરોન્મૃષ્ટાઙ્ગરાગો મુહુઃ ।
સંવર્તોપચિતૈસ્ત્રિલોક-ભસિતૈર્ભૂયોઽપિ યો લિપ્યતે
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૦॥

સર્વશ્ચેતનવર્ગ એષ પશુતામસ્યાનુમેને સ્વયં
તેષામેષ પતિઃ પ્રભુર્નિયમને નિર્મોચને ચ સ્વતઃ ।
ઇત્યામ્નાય-ગિરઃ સ્તુવન્તિ બહુશઃ શાખાસુ શાખાસુ યં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૧॥

યચ્છૂલં ગતસારમિત્યુપદદે ચક્રં જિઘૃક્ષુર્હરિઃ
તત્ખણ્ડો નિહિતસ્તુ યેન દનુજે તેનાપિ દુર્નિગ્રહઃ ।
નિર્જેતું લવણં પ્રતીક્ષ્ય-વિરહઃ શક્ત્યાઽભવત્ સર્વધા
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૨॥

માં નામ્ના શ્રુતિરગ્રહીદિતિ સુરાઃ ખ્યાતિં લભન્તે પરાં
માં વેદાહમિતિ શ્રુતિઃ કથયતીત્યુત્સિચ્યતે માધવઃ ।
તા યદ્દોરિષુ-ધન્વ-મન્યુષુ નમોવાકાન્વહન્તે શતં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૩॥

સર્ગશ્ચ પ્રતિસઞ્ચરશ્ચ જગતાં યત્પક્ષ્મણી સંશ્રિતૌ
શાસ્ત્રાણિ શ્રુતયોઽપિ વા યદધર-સ્પન્દં પ્રતીક્ષ્યાસતે ।
બન્ધો મોક્ષ ઇતિ દ્વયં તનુભૃતાં યસ્યાક્ષિ-કોણે સ્થિતં
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૪॥

શક્ત્યર્ધં વિનિવેશયામિ પરિગૃહ્ણીતેત્યુપચ્છન્દિતાઃ
સમ્ભૂયાપિ વયં તદર્ધ-વહને ન સ્મઃ સમર્થા ઇતિ ।
જગ્મુઃ પ્રાગમરાઃ શરાદિ-વિધયા યસ્ય સ્વયં શેષતાં
સ સ્વામી મમ દેવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૫॥

યાનબ્ધૌ વિનિમજ્જ્ય મીનવપુષા શૌરિશ્ચિરાયાવહત્-
યત્સન્ધારણમેકમેવ મહતાં માહાત્મ્યમુદ્ઘુષ્યતે ।

યાનદ્યાપિ વિધિર્બિભર્તિ વદનૈસ્તે યં વહન્ત્યાગમાઃ
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૬॥

જેતું ત્રીણિ પુરાણિ યેન સહસારૂઢે ધરિત્રી-રથે
    વેદાશ્વેષુ વિભુગ્ન-જાનુષુ વૃષો ભૂત્વા પ્રયસ્યન્હરિઃ ।
વોઢું તં ન રથં શશાક વિધૃતં શેષાત્મનાપિ સ્વયં
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૭॥

અમ્બા યદ્ગૃહ-મેધિની ત્રિજગતાં શબ્દાન્તરાણ્યન્તરા
    સન્ત્યજ્યોપપદં વદન્તિ ચ જના એકં યમેવેશ્વરમ્ ।
મુક્ત્વા ચ પ્રતિયોગિનં વદતિ યત્સૂનું કુમારં શ્રુતિઃ
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૮॥

વિશ્વં મુઞ્ચ બધાન વેતિ હિ પરાશક્તિર્યદાજ્ઞાપિતા
    જ્ઞાનેચ્છાકૃતિ-શક્તિષુ સ્વયમિમં વિન્યસ્ય સર્વં ભરમ્ ।
આસ્તેઽનુત્તર-સામરસ્ય-પરમાનન્દાનુસન્ધાયિની
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૩૯॥

ઉન્મીલચ્ચતુરગ્ર-વિંશતિ-શત-દ્વન્દ્વાત્મના સઙ્ખ્યયા
    નિર્ભક્તૈર્ભુવનૈઃ સનેતૃભિરપિ વ્યાપ્તં કલા-પઞ્ચકમ્ ।
યત્કોટ્યંશ-પરાખ્ય-શક્તિ-કણિકા-લેશસ્ય લેશાયતે
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૦॥

યસ્યાનન્દ-મહાર્ણવસ્ય કણિકા યા કાપ્યવિદ્યાનિલ-
    વ્યાધૂતા શતધા વિભિદ્ય ભુવનં વ્યાપ્તા શ્રુતીનાં ગણૈઃ ।
બ્રહ્મ ત્વં તદસીતિ વાદ-મુખરૈરદ્યાપિ ચાન્વિષ્યતે
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૧॥

શ્રેયઃ સંસરતાં કિમસ્તિ પરમં નામાપવર્ગાચ્ચ નઃ
    તદ્દાનાદધિકો ન કશ્ચન ગુણોઽસ્ત્યસ્મદ્ધિયાં ગોચરઃ ।
તદ્યદ્-દર્પણ-સંપ્રસાદ-સુલભં નાલં યદીય-સ્તુતૌ
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૨॥

પ્લુષ્ટે સ્થાવર-જઙ્ગમે શતધૃતૌ નષ્ટે જગત્સ્રષ્ટરિ
    વ્યાપ્તે દૈત્યરિપૌ હરેણ વિહરત્યસ્મિન્ મહેશાત્મના ।
અન્તર્ભાવયિતું સ્વયં તમપિ યસ્યેમે ગણાઃ સાક્ષિણઃ
    સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૩॥

નાશ-વ્યાપ્યમમઙ્ગલં તદિતરં માઙ્ગલ્યમેવં સ્થિતે
 નશ્યદ્-દૈવત-ધારિતૈરલમલઙ્કારૈરભવ્યૈરિતિ ।
નિત્યૈર્ભસ્મભિરેવ ભૂષયતિ યઃ સ્વાઙ્ગં જગન્મઙ્ગલં
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૪॥

ગઙ્ગામ્ભઃપરિશોષણં સ્મર-મદોચ્છેદો જગદ્-દાહ ઇ-
 ત્યાદ્યં નિગ્રહ-વૈશસં કલયતે કણ્ઠાદુપર્યેવ યઃ ।
અન્તઃ સન્તતમીહતે તુ શિવમાકીટં જગન્માત્રકે
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૫॥

અભ્યર્ચન્તિ યમામનન્તિ યમનુધ્યાયન્તિ યં સન્તતં
 ગીર્વાણાઃ ફણિનો નરા ઇતિ કિમિત્યાશ્ચર્યમાચક્ષ્મહે ।
યો દેવઃ સ્વયમપ્યસૌ શિવમનુધ્યાયન્ શિવત્વં ગતઃ
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૬॥

યાસ્વપ્સુ દ્રુહિણોઽજનિષ્ટ ધરણૌ યત્રાવતારો હરેઃ
 લિલ્યે યત્ર હુતાશને ત્રિજગતાં માતા વિદેહાત્મજા ।
તદ્ભૂત-ત્રયમપ્યભૂદ્યતુરં યત્તેજસો ધારણે
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૭॥

યદ્ધર્માનુચિકીર્ષયા પ્રવવૃતે ભિક્ષાશ્રમોઽનુત્તમો
 યદ્દાસ્ય-વ્રત-લાઞ્છનં પરમિતિ ખ્યાતા વિભૂતિઃ શ્રુતૌ ।
યત્સૂક્તિ-શ્રવણેચ્છયા સુકૃતિનો મુઞ્ચન્તિ કાશ્યામસૂન્
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૮॥

યત્સારથ્ય-પદસ્થિતેઃ શતધૃતેરાયુઃ પરાર્ધાધિકં
 શૌરેર્યં પ્રતિ માર્ગણત્વમયતો જાગર્તિ લક્ષ્મીઃ સ્થિરા ।
યત્પાદાશ્રયિણઃ ફણાધર-પતેર્વાચઃ પ્રથન્તેતરાં
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૪૯॥

પારમ્યે નિગમાગમાઃ પરમ-સૌલભ્યે પિશાચાદયો
 વાઞ્છાતીત-પદાર્પણે સ ભગવાન્ વૈયાઘ્રપાદો મુનિઃ ।
સર્વાગઃસહનેઽન્ધકશ્ચ દનુજો યસ્ય સ્થિતાઃ સાક્ષિણઃ
 સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૫૦॥

સારાઃ શબ્દ-કુલસ્ય યેન નિગમા વાહા ઇતિ સ્વીકૃતાઃ

સારાવદ્રિષુ કાર્મુકં ગૃહમિતિ દ્વૌ હેમ-રૂપ્યૌ હૃતૌ ।
સારા વારિષુ જાહ્નવીતિ વિધૃતા ભક્તાનુકમ્પાચ્છલાત્-
સ સ્વામી મમ દૈવતં તદિતરો નામ્નાપિ નામ્નાયતે ॥ ૫૧॥

ભૂમિર્ભ્રામ્યતિ બદ્ધ એવ મરુતિ પ્રત્યગ્ભ્રમોઽત્યદ્ભુતો
ભ્રામ્યન્ત્યેવ સહાશ્રયેણ ચ દિવિ જ્યોતીંષિ સર્વાણ્યપિ ।
આવર્તોઽયમપાં ભ્રમઃ પરિણતો મૂર્તિર્હરસ્યાષ્ટમી
યાઽસાવપ્પયદીક્ષિતો જયતિ સા ત્વેકા નિરસ્તભ્રમા ॥ ૫૨॥

ઇતિ શ્રીનીલકણ્ઠદીક્ષિતવિરચિતા શિવોત્કર્ષમઞ્જરી સમાપ્તા ।

Proofread by Rajani Arjun Shankar

---

*Shivotkarshamanjari*

pdf was typeset on March 19, 2021

Please send corrections to *sanskrit@cheerful.com*